५०३

श्रीः ।

शिवहरराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

द्वादशं

बलिदानक्रमः ।

उक्तराजगुरुवंश्यपण्डितश्रीरघुराज-

दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम) यन्त्रागारे

मुद्रयित्वा प्रकाशितम् ।

तृतीयावृत्तिः ।

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकारः १८६७ वार्षिक २५ तमराज

नियमानुरोधेन प्रकाशकाधीनाः सन्ति ।

अथ कालिदासकृतम्:

॥ श्रीगणेशाय नमः ॥

शाक्तप्रमोदः ।

अथबलिदानक्रमः ।

स्वयमुत्तराभिमुखꣳपूर्व्वाभिमुखम्बलिम् अव्यग्रावयवंसुन्दरं दृष्टपुष्टम्माल्यङ्कण्ठेवेष्टयित्वास्नातं समानीयकृताञ्जलिꣳपठेत् ॥ ॐवाराहीयमुनागङ्गनकरतोयासरस्वती॥ कावेरीचन्द्रभागाचसिन्धुमैरवसागराः ॥ पशुस्नानविधानायसान्निध्यमिहकल्पय॥इति तीर्त्थान्यावाह्य। ॐअग्निꣳपशुरासीत्तेनायजन्तसएतँल्लोकमजयद्यस्मिन्नग्निःसतेलोकोभविष्यतितञ्जेष्यसिपिवैताअपः ॥ ॐवायुꣳपशुरासीत्तेनायजन्तसएतँल्लोकमजयद्यस्मिन्वायुःसतेलोकोभविष्यतितञ्जेष्यसिपिवैताअपः ॥ ॐसूर्य्यꣳपशुरासीत्तेनायजन्तसएतँल्लोकमजयद्यस्मिन्सूर्य्यःसतेलोकोभविष्यति तञ्जेष्यसिपिवैताअपः ॥ ॐवाचन्तेशुन्धामि प्राणन्तेशुन्धामि चक्षुस्तेशुन्धामिश्रोत्रन्तेशुन्धामि मेढ्रन्तेशुन्धामि पायुन्तेशुन्धामि॥ चारित्रांस्तेशुन्धामि मनस्तआप्यायताम् । वाक्तआप्यायताम्। प्राणस्तआप्यायताम्।चक्षुस्तआप्यायताम् । श्रोत्रन्तआप्यायताम्। यत्तेक्रूरꣳयदास्तितन्तत्तआप्यायताम् । निष्टचायताम्।तत्तेशुद्धयातुशोमहोभ्यः स्वाहा॥ इतिमन्त्रैःस्नापयित्वा ॐ मेघाकारस्तम्भमध्येपशुबन्धायसशृङ्गाद्यवयवम्पशुम्बन्धयबन्धयब्रह्माण्डखण्डरूपस्तम्भेपशुम्बन्धयबन्धयह्रꣳफट्स्वाहाॐह्राँह्रीँह्रूँचाँचण्डिकायै इमम्पशुम्प्रोक्षामिस्वाहा इतिप्रोक्षणम् । ततस्सशृङ्गाद्यवयवम्पशुम्मोक्षङ्कुरुकुरुस्वाहेतिमोक्षङ्कृत्वाक्षमस्वेतिलला टेसिन्दूरन्दत्त्वाॐछागपशवेनमइतिपाद्यादिकन्दत्त्वाएतदधिप

तयेॐअग्नयेनमःएतत्सम्प्रदानीयायैह्रींअमुकदेवतायैनमःइतिपु ष्पन्दत्वापशोरङ्गदेवताःपूजयेत् ॥ यथा शिरसिॐरुधिरवदनायै नमः ललाटे ॐशार्ङ्गिण्यैनमः । भ्रूमध्येॐभङ्गायैनमः चक्षुषोः ॐत्रिनेत्रायैनमः कर्णयोः ॐपार्व्वत्यैनमःघ्राणेॐगौर्य्यैनमः चि बुकेॐचण्डिकायैनमः दन्तपङ्क्तौॐउग्रचण्डिकायैनमः जिह्वाया म् ॐचण्डघण्टायैनमः मुखे ॐविरूपाक्षायैनमः ग्रीवायाम् ॐचण्डायैनमः पृष्ठे ॐमहाभैरव्यैनमः उदरे ॐवैष्णव्यैन मः चतुष्पदेॐचण्डप्रियायैनमः पार्श्वयोःॐसर्व्वैश्वर्य्यैनमः कटिदेशेॐविरूपाक्षायैनमः खुराग्रेॐकौशिक्यैनमः लाङ्गले ॐप्रहर्षिण्यैनमः सर्वाङ्गेॐपश्वधिष्ठातृदेवताभ्योनमः इतिस म्पूज्यउत्सृजेत् ॥ विष्णुः ॐतत्सदद्याश्विनेमासिशुक्लेपक्षेऽमुक तिथौवार्षिकशरत्कालीनामुकदेवतामहोत्सवे अमुकगोत्रस्या मुकस्यअमुकदेवताप्रीतिकामनया अमुकदेव्यैइमम्पशुंवह्निदै वतन्तुभ्यमहङ्घातयिष्यामिइत्युत्सृज्यकृताञ्जलिꣳपठेत् ॥ ॐ छागत्वम्बलिरूपेणममभाग्यादुपस्थितः ॥ प्रणमामिततस्सर्व्व रूपिणम्बलिरूपिणम् ॥ यज्ञार्त्थेपशवस्सृष्टास्स्वयमेवस्वय म्भुवा ॥ अतस्त्वाङ्घातयिष्यामितस्माद्यज्ञेवधोऽवधः ॥ प शुयोनिप्रसूतोऽसिपूजाहोमादिकर्म्मसु ॥ तुष्टाभवतुसादेवीसर क्तपिशितैस्तव ॥ चंडिकाप्रीतिदानेन दातुरापद्विनाशनः ॥ चामुण्डाबलिरूपायबलेतुभ्यन्नमोऽस्तुते ॥ ततः ॥ पशुपा शायविद्महेशिरश्छेदायधीमहि ॥ तन्नꣳपशुꣳप्रचोदयात् ॥ इति कर्णेजपेत् ॥ ततःखड्गमानीय ह्रीं इतिवीजाक्षराँल्लिखित्वाध्याये त् ॥ कृष्णम्पिनाकपाणिञ्चकालरात्रिस्वरूपिणम् ॥ उग्ररक्ता स्यनयनंरक्तमाल्यानुलेपनम् ॥ रक्ताम्बरधरञ्चैवपाशहस्तङ्कटु म्बिनम् ॥ पिबमानञ्चरुधिरम्भुञ्जानङ्कव्यसंहतिम्॥एवङ्खड्गन्ध्या

त्वागृहीत्वा ॥ ॐरसनात्वञ्चण्डिकायाःसुरलोकप्रसाधकः॥इत्य भिमन्त्र्य ॥ ऐंह्रींखड्गायनमइतिपाद्यादिभिःसम्पूज्य पुनर्म्मुष्टौ ॐमहादेवायनमः धारेॐयमायनमः अग्रे ॐब्रह्मणेनमः ॥ ॐॐअसिर्व्विशनस×खड्गस्तीक्ष्णधारोदुरासदः ॥ श्रीगर्भोविजय श्चैवधर्म्मपालनमोऽस्तुते ॥ इत्यष्टौतवनामानिस्वयमुक्तानिवेध सा ॥ नक्षत्रङ्कीर्त्तिकातुभ्यङ्गुरुर्देवोमहेश्वरः ॥ हिरण्यञ्चशरीरन्ते धातादेवोजनार्दनः ॥ पितापितामहोदेवस्त्वम्मांम्पालयसर्व्वदा॥ नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्र×कृशोदरः ॥ भावशुद्धोमर्ष्षणश्च अतितेजास्तथैवच ॥ ॐतीक्ष्णदंष्ट्रायनमइतिपुष्पन्दत्त्वा॥ ॐ ह्रींफट्इतिखड्गमादाय ॐकालिकालिवज्रेश्वरीलोहदण्डायैनम इतिजपित्वाछागस्यग्रीवायाम् ॥ खड्गत्वंशीघ्रञ्छिन्धिछिन्धिफ ट्फट्स्वाहा इतिपूर्व्वाभिमुखम्बलिंस्वयमुत्तराभिमुखउत्तराभिमु खम्बलिंस्वयम्पूर्व्वाभिमुखोवासकृत्प्रहारेणछिन्द्यात् ॥ ततोमृ न्मयादिपात्रेरुधिरमादाय चतुर्भागङ्कृत्वाऐशान्याम् ॐविदारि कायैनमः आग्नेय्याम्ॐपूतनायैनमः नैर्ऋत्याम् ॐपापराक्षस्यै नमः वायव्याम् ॐकौशिक्यैनमः ॐतत्सदद्यामुकेमास्यमुकप क्षेऽमुकतिथौवार्ष्षिकशरत्कालीनामुकदेवतामहोत्सवेऽमुकगोत्र स्यामुकस्यदशवर्ष्पर्यन्तच्छिन्नयामुकदेवताप्रीतिकामनयाऽमुकदे व्यैछागपशुरुधिरन्दास्यामि इतिसङ्कल्प्य ॐकालिकालिमहा कालिकालिकेपापनाशिनी ॥ शोणितञ्चबलिङ्गृह्णवरदेवामलो चने ॥ एषरुधिरबलिः ॥ ॐदक्षयज्ञेतिमन्त्रेणदद्यात् ॥ तत ऐंह्रींश्रींकौशिकिरुधिरेणाप्यायतामितिवदेत् ॥ ततःशिरसि ज्वलद्दीपशिखान्दत्त्वा ॐतत्सदद्यामुकेमास्यमुकपक्षेऽमुकतिथौ वार्ष्षिकशरत्कालीनामुकमहोत्सवेअमुकगोत्रस्यामुकस्यश्रीमद मुकदेवतादर्शनाभिवन्दनस्पर्शनाभिपूजनस्नपनतर्पणजनि-

तपूर्व्वपूर्व्वाधिकपुण्यप्राप्तिकामोऽमुकदेव्यैसप्रदीपच्छागपशुशी
र्ष्पन्दास्यामि इतिसङ्कल्प्य ॥ एषसप्रदीपच्छागपशुशीर्ष्पबलिः
ह्रींदुर्ग्गादेव्यैनमइत्युत्सृज्य ॥ ॐजयत्वंसर्व्वभूतेशेसर्व्वभूत
समावृते ॥ रक्षमान्निजभूतेभ्योबलिम्भुङ्क्ष्वनमोऽस्तुते ॥ ततः
खड्गरुधिरमादाय ॥ ॐयंयंस्पृशामिपादेनयंयंपश्यामिचक्षु
षा ॥ ससमेवश्यताय्यांतुयदिशक्रसमोभवेत् ॥ इतिललाटेति
लकङ्कुर्य्यात् ॥ मेषघातेतुमेषेत्यूहेनयोज्यम् ॥ मेषरुधिरदा
नेतुएकवर्ष्पावच्छिन्नामुकदेवताप्रीतिकामः प्रभूतबलिदानेतुद्वौ
वात्रीन्वाअग्रतःकृत्वासम्प्रोक्ष्यतत्तत्पशुभ्योनमइतिसम्पूज्य छा
गत्वमित्येकवचनानूहेनप्रयोगः ॥ पश्चन्तरेऽप्येवम् ॥ वाक्येतु
एतान्पशून् तुभ्यमहङ्घातयिष्ये ॥ रुधिरदानेतुएतान्रुधिरब
लीन्दास्यामिइतिसङ्कल्प्यप्रत्येकेनदद्यात् ॥ शीर्ष्पदानमप्येव
म् ॥ ततोमूलमन्त्रय्यँथाशक्तिजप्त्वा समर्प्यप्रणमेदितिनन्दिके
श्वरपुराणोक्तपद्धतिः ॥ ॥ ॥

अथ तान्त्रिकबलिदानविधिः ।

तत्रमुलक्षणम्पशुन्देव्यग्रेसंस्थाप्यवक्ष्यमाणविधिनाउत्सृजेत् ॥
तदुक्तय्यँामले ॥ देव्यग्रेस्थापयित्वातुपशुँल्लक्षणसय्युतम् ॥
श्वेतसर्ष्पविक्षेपाद्भूतानुत्सारयेत्ततः ॥ अर्घ्योदकेनसम्प्रो
क्ष्यअस्त्रेणसंरक्ष्यकवचेनावगुण्ठ्यधेनुमुद्रयामृतीकृत्यगन्धपुष्पा
क्षतैरपशुंसम्पूज्यमूलेन सप्तधातत्त्वमुद्रयाप्रोक्षणङ्कृत्वा कर्णेइम
म्मन्त्रम्पठेत् ॥ पशुपाशायविद्महेविश्वकर्म्मणेधीमहि ॥ तन्नो
जीवरप्रचोदयात् ॥ ततोह्रींकालिकालिवज्रेश्वरिलोहदण्डायैनम
इतिमन्त्रेणखड्गम्पूजयेत् ॥ ततरखड्गस्याग्रमध्यमूलङ्क्रमेणपूज
येत् ॥ यथाह्रूँवागीश्वरीब्रह्मभ्यान्नमः ॥ ह्रूँलक्ष्मीनारायणाभ्या

न्नमः ह्रूँ उमामहेश्वराभ्यान्नमः ॥ ततोब्रह्मविष्णुशिवशक्तियुक्ता यखड्गायनमइतिसर्व्वत्रपूजयित्वाप्रणमेत् ॥ खड्गायखरशाणाय शक्तिकार्य्यार्त्थतत्परः ॥ पशुच्छेद्यस्त्वयाशीघ्रङ्कुङ्कनाथनमोऽस्तुते ॥ ततोमहावाक्यममुकदेवतार्प्रीतिकामोऽमुकदेव्यैइमम्पशुन्तुभ्यमहंसम्प्रददे ॥ ततोनिवेदयेत् ॥ यथोक्तेनविधानेनतुभ्यमस्तुसमर्प्पितम् ॥ ततोबलिञ्छिन्द्यात् ॥ ततोरुधिरंसमांसन्देव्यैदद्यात् ॥ ततोऽवशिष्टम्बटुकादिभ्योबलिन्दद्यात् ॥ यथा ॥ ह्रूँयाँबटुकायनमइतिगन्धादिभिस्सम्पूज्यपूर्व्ववन्मन्त्रेणवायव्येबलिन्दद्यात् ॥ ह्रूँयाँयोगिनीभ्योनमइतिसम्पूज्यपूर्व्ववन्मन्त्रेणईशानेबलिन्दद्यात् ॥ ह्रूँक्षाँक्षेत्रपालायनमइतिसम्पूज्यपूर्व्ववन्मन्त्रेणनैर्ऋत्याम्बलिन्दद्यात् ॥ ह्रूँगाँगणपतयेनमइतिसम्पूज्यपूर्व्ववन्मन्त्रेणआग्नेय्याङ्गणेशायबलिन्दद्यात् ॥ इतितन्त्रसारः ॥

अथ होमपद्धतिः।

तत्रादौकुण्डस्थण्डिलादिरीतिः ॥ मत्स्यपुराणे ॥ प्रागुदक्प्रवणाम्भूमिङ्कारयेद्यत्नतोनरः ॥ प्रागुदक्प्रवणाम्पूर्व्वनीचामुत्तरनीचाँवा तत्रवसिष्ठपञ्चरात्रेविज्ञानललितायाञ्च ॥ सर्व्वाविकारिकङ्कुण्डञ्चतुरस्रन्तुसर्व्वदम् ॥ चतुरस्रञ्चतुष्कोणम् ॥ भविष्योत्तरे ॥ सहस्रेत्वथहोतव्येकुर्य्यात्कुण्डङ्करात्मकम् ॥ द्विहस्तमयुतेतच्चलक्षहोमेचतुष्करम्॥द्विहस्तादिकेयामलः ॥ पूर्व्वपूर्व्वस्यकुण्डस्यकोणसूत्रेणनिर्म्मितम् ॥ उत्तरोत्तरकुण्डानाम्मानन्तत्परिकीर्त्तितम् ॥ पूर्व्वपूर्व्वस्यकुण्डस्यहतद्विहस्तादिमितस्यकोणसूत्रेण ईशानान्निर्ऋतिकोणदत्तसूत्रेण परिमितयँन्मानमुत्तरोत्तरकुण्डानान्तदेव पारिभाषिकन्द्विहस्तादिमानन्न तु प्रकृतहस्तद्वैगुण्यादिमितम् ॥ तथात्वे द्विहस्तादिमितस्यचतुर्हस्तप

रिमाणापत्तेः ॥ कृषिकस्यभूमेःपरिमाणवत् ॥ वसिष्ठपञ्चरात्रे ॥ यावान्कुण्डस्यविस्तारःखननन्तावदिष्यते ॥ हस्तैकेमेखलास्तिस्रोवेदाग्निनयनाङ्गुलाः ॥ कुण्डेद्विहस्तेताज्ञेयारसवेदगुणाङ्गुलः ॥ चतुर्हस्तेतुकुण्डेतावसुतर्क्कयुगाङ्गुलाः ॥ ब्रह्मचारिमेखलावत् ॥ कुण्डवेष्टितामृद्धटिताः ॥ ताश्चखातदेशाद्वाह्येएकाङ्गुलरूपङ्कुण्ठम्परित्यज्यउच्छ्रयेणविस्तारेणचेत्यादिक्रमेणवेदाद्यङ्गुलाः ॥ एतद्विपरीतास्तन्त्रान्तरोक्ताव्यवहारविरुद्धाः ॥ वेदाश्चत्वारः अग्नयस्त्रयः नयनेद्वे रसाः षट् गुणास्त्रयः वसुतर्क्कयुगानि अष्टषट्चत्वारि पिङ्गलामते । खातादेकाङ्गुलन्त्यक्त्वामेखलानाँव्विधिर्भवेत् ॥ एककुण्डस्यपश्चिमदिक्कर्त्तव्यतामाहमहादाननिर्णयेवसिष्ठपञ्चरात्रे ॥ भुक्तौमुक्तौतथा पुष्टौजीर्णोद्धारेतथैवच ॥ सदाहोमेसदाशान्तावेकँव्वारुणदिग्गतम् ॥ शारदातिलके॥ होतुरग्रेयोनिरासामुपर्य्यश्वत्थपत्रवत्॥ मुष्टचरत्न्येकहस्तानाङ्कुण्डानाय्योनिरीरिता ॥ षट्चतुर्द्व्यङ्गुलायामविस्तारोन्नतिशालिनी ॥ एकाङ्गुलन्तुयोन्यग्रङ्कुर्य्यादीपदधोमुखम् ॥ एकैकाङ्गुलतोयोनिङ्कुण्डेष्वन्येषुवर्द्धयेत् ॥ यावद्द्वयङ्क्रमेणैवयोन्यग्रमपिवर्द्धयेत् ॥स्थलादारभ्यनालंस्याद्योन्यामध्येसरन्ध्रकम् आसाम्मेखलानाम् अश्वत्थपत्रवदित्यनेनचतुरङ्गुलविस्तृतमूलाद्यथोक्तक्रमेणएकाङ्गुलान्तस्सङ्कुचितविस्ताराः ॥ होमनिमित्ताग्निस्थापनार्त्थस्थण्डिलविधिर्य्यथा ॥ वसिष्ठसंहितायाम् तस्मात्सम्यक्परीक्ष्यैवङ्कर्त्तव्याशुभवेदिका ॥ हस्तमात्रंस्थण्डिलञ्चैवासङ्क्षिप्तेहोमकर्म्मणि ॥ क्रियासारेऽपि ॥ कुण्डमेवँव्विधन्यस्यात्स्थण्डिलञ्चैवसमाश्रयेत् ॥ शारदातिलकेऽपि ॥ नित्यन्नैमित्तिकङ्काम्यंस्थण्डिलेवासमाचरेत् ॥ हस्तमात्रन्तुतत्कुर्य्याच्चतुरस्रंसमन्ततः ॥ इतितिथ्यादितत्त्वे अपिचगोभिलः ॥

अनुगुप्ताअपआहृत्यप्रागुदक्प्रवणन्देशंसमञ्चापरिसमुह्यउपलि
प्यमध्यत×प्राचींरेखामुल्लिख्यउदीचीञ्चसंहताम्पश्चान्मध्येप्राची
स्तिस्रउल्लिख्याभ्युक्षयेल्लक्षणावृदेषासर्व्वत्रेति ॥ अनुगुप्ताआ
च्छादिता×पतितादिभिरदृष्टाइतियावत् ॥ प्राङ्नीचादिफलमा
हगृह्यसङ्ग्रहेगोभिलपुत्रः ॥ प्राङ्नीचब्रह्मवर्च्चस्यमुदङ्नीचंयशो
त्तमम् ॥ पित्र्यन्दक्षिणतोनीचम्प्रतिष्ठालम्भकंसमम् ॥ यशोत्तम
मित्यत्रसान्ताअप्यदन्ताइत्युक्तेरदन्तोऽपि यशशब्दःगयाशिरइ
तिवत् ॥ परिसमुह्यसर्व्वत×कुशै×पार्श्वादिकमपसार्य्यउत्तरस्या
न्दिशिसार्द्धहस्तोपरिक्षिपेत् ॥ परिसमुह्यवितस्तित्रयेउत्तरतउ
त्करङ्करोतीतिहरिशर्म्मधृतवचनात् ॥ तत्तदुपलेपनम् ॥ तत्रका
रणमाहगृह्यसङ्ग्रहः ॥ इन्द्रेणवज्राभिहत×पुरावृत्रोमहासुरः ॥ मे
दसातस्यसङ्क्षिन्नातदर्त्थमुपलेपयेत् ॥इति ॥ मध्यतःस्थण्डिला
भ्यन्तरेदक्षिणांशेनतुमध्यांशे उदग्गतैकविंशत्यङ्गुलरेखानुरोधा
त् ॥ अन्यथा ॥ कुशैस्सम्मार्ज्जयेद्भूमिंशुद्धामादौशुचिस्ततः ॥
हस्तमात्राञ्चतुरस्राङ्गोमयेनोपलेपयेत् ॥ इतिभारद्वाजीयहस्त
प्रमाणस्थण्डिलेतदनुपपत्तेः ॥ प्राचीम्प्राग्गताम् ॥ उदीचीञ्च
संहताम् ॥पश्चादिति ॥ प्राग्गताया×पश्चिमेभागेसँल्लग्नामुदग्गाम्
मध्येउदग्गताया×प्राची×प्रागग्रास्तिस्रोरेखाउल्लिख्याभ्युक्षयेदि
ति रेखाभ्यउद्धृतमृत्तिकोद्धरणपूर्व्वकमभ्युक्षयेत् ॥ उल्लिख्य
उद्धृत्याभ्युक्षयेदिति कात्यायनसूत्रात् ॥ उत्करप्रक्षेपदेशमाह
गृह्यसङ्ग्रहः ॥ उत्करङ्कृत्वरेखाभ्योऽरत्निमात्रेनिधापयेत् ॥ द्वार
मेतत्पदार्त्थानाम्प्रागुदीच्यान्दिशिस्मृतम् ॥ इति ॥ परिसमू
हनादिपरिषेकान्तङ्कर्म्मलक्षणसञ्ज्ञकन्तस्यलक्षणस्यावृत्प्रक्रि
यासर्व्वत्र यत्रयत्राग्निप्रणयनन्तत्रतत्रबोध्या ॥ रेखाप्रमाणमाह
छन्दोगपरिशिष्टेकात्यायनः ॥ दक्षिणेप्राग्गतायास्तुप्रमाणन्द्वा

दशाङ्गुलम् ॥ तन्मूललग्नायोदीचीतस्याएवन्नवोत्तरम् ॥ उदग्ग तायास्सँल्लग्नाश्शेषाऽप्रादेशमात्रिकाः ॥ सप्तसप्ताङ्गुलांस्त्यक्त्वा कुशेनैवसमुल्लिखेत् ॥ नवोत्तरन्नवाधिकन्द्वादशाङ्गुलमेकविंशत्य ङ्गुलमित्यर्थः ॥ शेषाः उक्तरेखयोरवशिष्टास्तिस्रऽकुशेनइति सर्व्वत्राभिसम्बध्यते ॥ एवकारेणशाखान्तरोक्तस्यव्यावृत्तिः ॥ रे खाणान्देवतावर्ण्णाश्चाहस्मृतिः ॥ प्राग्गतापार्त्थिवीज्ञेयाचाग्नेयी चाप्युदग्गता ॥ प्राजापत्यातथाचैन्द्रीसौमीचप्राक्कृतास्मृता ॥ पार्त्थिवीपीतवर्ण्णास्यादाग्नेयीलोहिताभवेत् ॥ प्राजापत्याभवे त्कृष्णानीलाचैन्द्रीप्रकिर्त्तिता ॥ श्वेतवर्ण्णेनसौमीस्याद्रेखाणाँ व्वर्ण्णलक्षणम्॥ अग्निस्थापनपर्य्यन्तंसव्यहस्तप्रादेशस्याविधान माहगृह्यसङ्ग्रहः ॥ सव्यम्भूमौप्रतिष्ठाप्यप्रोल्लिखेद्दक्षिणेनतु॥ता वन्नोत्थापयेत्पार्णिंय्यावदग्निन्निधापयेत् ॥ मानकर्त्तारमाहच्छन्दो गपरिशिष्टेकात्यायनः॥मानक्रियायामुक्तायामनुक्तेमानकर्त्तरि ॥ मानकृद्यजमानस्स्याद्विदुषामेषनिश्चयः ॥ अङ्गुष्टाङ्गुलिमानमाह सएव ॥ अङ्गुष्टाङ्गुलिमानन्तुयत्रयत्रोपदिश्यते ॥ तत्रतत्रबृह त्पर्व्वग्रन्थिभिर्म्मिनुयात्सदा ॥ यजमानासन्निधौहोमेतुसाधार णाङ्गुलिमानम्।यथाकपिलपञ्चरात्रे॥ अष्टभिस्तैर्भवेज्जैष्ठ्यंमध्य मंसप्तभिर्य्यवैः ॥ कन्यसंषड्भिरुद्दिष्टमङ्गुलम्मुनिसत्तमैः॥तैऽप्र क्रम्यमानयवैः ॥ कन्यसङ्कनिष्ठम् ॥ मानन्तुपार्श्वेन ॥ षड्य वाऽपार्श्वमिताः॥इतिकात्यायनवचनात्॥इतिसंस्कारतत्त्वम् ॥ नाजप्तस्सिद्धचतेमन्त्रोनाहुतश्चफलप्रदः ॥ नानिष्टोयच्छतेका मांस्तस्मात्रितयमर्च्चयेत् ॥ पूजयालभतेपूजाञ्जपात्सिद्धिर्न्नसं शयः ॥ विभूतिश्चाग्निकार्य्येणसर्व्वसिद्धिश्चविन्दति ॥ नीलतन्त्रे पि॥ नित्यहोमम्प्रवक्ष्यामिसर्व्वार्त्थय्यैनविन्दति॥ सपर्य्यांसम्य गापाद्यबलिपूर्व्वञ्चरेद्विधिम् ॥ ततोहोमन्तर्प्पणञ्चरेत्साधकसत्त

मः ॥ बलिंवैश्वादिकञ्चैवब्राह्मणस्समुपाचरेत् ॥ अग्घ्योंदकेनस म्प्रोक्ष्यतिस्रोरेखास्समालिखेत् ॥ विधिवदग्निमानीयक्रव्यादेभ्यो नमस्तथा ॥ मूलमन्त्रंसमुच्चार्य्यकुण्डेवास्थण्डिलेऽपिवा ॥भूमौ वासंस्तरेद्दर्ब्भिव्याहृतित्रितयेनच ॥ स्वाहान्तेनत्रिधाहुत्वाषड ङ्गहवनञ्चरेत् ॥ तथा ॥ ततोदेवींसमावाह्यमूलेनषोडशाहुति म् ॥ हुत्वास्तुत्वानमस्कृत्यविसृजेदिन्दुमण्डले ॥ श्यामादौवि शेषः ॥ भैरवाँश्चहुनेदष्टौ आज्यान्वितैस्तिलैश्शुभैः ॥ पूर्व्वादि दिक्क्रमेणैवततोहोमंसमाचरेत् ॥

अथ सङ्क्षेपहोमप्रयोगः।

कुण्डेवास्थण्डिलेवापिवीक्षणाद्यभिसंस्कृते ॥ प्रागग्राउदग ग्राश्चतिस्रोरेखास्समालिखेत् ॥ तथाच ॥ वीक्षणम्मूलमन्त्रेणश रेणताडनम्मतम्॥तेनैवप्रोक्षणम्प्रोक्तंवर्म्मणाभ्युक्षणम्मतम् ॥ त तोमूलमुच्चार्य्यकुण्डायनमइतिसज्पूज्यप्रागग्रास्तिस्रोरेखाः कर्त्त व्याः ॥ प्रागग्रेषुमुकुन्देशपुरन्दरान् प्रादक्षिण्येनसम्पूज्यउदगग्रा सुब्रह्मवैवस्वतेन्दून्पूजयेत्॥ सुन्दरीपक्षेतुसर्व्वत्रषट्तारीप्रयोगः॥ षट्तारीच ऐंह्रींश्रींऐंक्लींसौः ब्रह्मणेनमः ॥ एवङ्क्रमेणपूजयेत् ॥ त था ब्रह्मसंहितायां होमकुण्डे ॥ ऐशान्याँव्वेदिकांहस्तविस्तारो न्नतिशालिनीम् ॥ कृत्वास्मिंस्थापयेत्कुम्भय्यँथोक्तक्रमयोगतः ॥ तत्रसम्पूजयेद्देवय्यँथाविध्युपचारकैः ॥ ततोहोमम्प्रकुर्व्वीतदेव तासन्निधानतः॥ ततः कुण्डमध्येषट्कोणवृत्तत्रिकोणन्तद्बहिरष्टद लपद्मन्तद्बहिश्चतुरस्रञ्चतुर्द्वारसमेतँल्लिखित्वातदुपरिमूलेनपुष्पा ञ्जलिन्दद्यात् ॥ सुन्दरीपक्षेतुबालया ॥ततः सर्व्वाणिप्रणवेनाभ्यु क्ष्यवह्नेय्यौंगपीठमर्च्चयेत् ॥ तद्यथा ॥ कर्णिकोपर्य्याधारश क्त्यादीन्सम्पूज्याऽग्न्यादिकोणचतुष्केषु ॥ ॐधर्म्मायनमःॐ

ज्ञानायनमः ॐ वैराग्यायनमः ॐऐश्वर्य्यायनमः ॥ पूर्व्वादिदिक्षु ॐअधर्म्मायनमःॐअज्ञानायनमः ॐअवैराग्यायनमः ॐअनैश्वर्य्यायनमः ॥ मध्ये ॐ अनन्तायनमः ॐ पद्मायनमः ॐ अंअर्क्कमण्डलायद्वादशकलात्मनेनमः ॐ उंसोममण्डलायषोडशकलात्मनेनमः ॐ मंव्वह्निमण्डलायदशकलात्मनेनमः ॥ तत×केसरेषुपूर्व्वादिमध्येच ॐपीतायैनमः ॐ श्वेतायैनमः ॐ अरुणायैनमः ॐकृष्णायैनमः ॐ धूम्रायैनमः ॐ तीव्रायैनमः ॐ स्फुलिङ्गिन्यैनमः ॐ रुधिरायैनमः ॐ ज्वालिन्यैनमः ॥ ततोरंवह्नचासनायनमः ॥ ततः ॥ वागीश्वरीम्तुन्नातान्नीलेन्दीवरलोचनाम् ॥ वागीश्वरेणसयुँक्ताङ्कीडाभावसमन्विताम् ॥ इतिध्यात्वा ॥ ॐ ह्रींवागीश्वरायनमः ॐ वागीश्वर्य्यैनमइतिमन्त्रेणपञ्चोपचारैस्सम्पूज्य सूर्य्यकान्तादिसम्भूतंश्रोत्रियगेहजव्वावह्निमानयेत् ॥ सुन्दरीपक्षेतुकामेश्वरङ्कामेश्वरीम्पूजयेत् ॥ गौतमीये ॥ पाषाणभववह्निश्चयदिवारणि सम्भवम् ॥ श्रोत्रियाणाङ्गेहजञ्चवनस्थव्वाथवाहरेत् ॥ यदृच्छालाभसयुँक्तोऽप्ययोग्योयागकर्म्मणि ॥निरग्निब्राह्मणाल्लब्धोह्यर्द्धलाभकरोभवेत् ॥क्षत्रबन्धोश्चतुर्त्थांशफलन्दद्याद्धुताशनः ॥ वैश्याच्छूद्राच्चविफलञ्जायतेहोमकर्म्मणि ॥ तस्मात्सर्व्वप्रयत्नेनव ह्निमुक्तंसमाहरेत् ॥ तन्त्रान्तरे ॥ द्विजातिभवनाद्वापिवह्निमानीयसाधकः ॥ वौषडन्तेनमूलेनमन्त्रितन्तँव्विलोकयेत् ॥ अग्निमावाहयेदस्त्रमन्त्रेणतदनन्तरम् ॥ हूम्फडन्तेनमूलेनक्रव्यादांशम्परित्यजेत् ॥ ततःॐ वह्नेय्यौंगपीठायनमः ॥ चतुर्दिक्षु ॐ वामायैनमः एवंज्येष्ठायैनमः रौद्रचैनमः ॥ अम्बिकायैनमः ॥ ततोमूलमुच्चार्य्याऽमुकदेवताकुण्डायनमः ॥ इतिकुण्डंसम्पूज्य तदधोवागीश्वरीम् ॥ तत्तद्देवतारूपांऋतुमतीन्ध्यात्वा यथोक्तव

ह्निमानीयवीक्षणादिभिस्सँस्कृत्यरमितितस्माद्वह्निमुद्धृत्यमूल मुच्चार्य्यहूँफट्क्रव्यादेभ्यःस्वाहा इत्यनेनक्रव्यादांशम्परित्यज्य वह्निमन्त्रेणसंरक्ष्यहूमित्यवगुण्ठ्य धेनुमुद्रयामृतीकृत्यबाहुभ्यां समुद्धृत्यकुण्डोपरित्रिꣳपरिभ्राम्यजानुस्पृष्टमहीतलः शिवबीज बुद्धचात्मनोऽभिमुखन्देव्यायोनौएनङ्क्षिपेत् ॥ ततोह्रींव्वह्निमूर्त्त येनमः इत्यभ्यर्च्च्य रंवह्निचैतन्यायनमः इतिचैतन्यन्तत्रसय्यो ज्य वोचितपिङ्गलहनहनदहदहपचपचसर्व्वज्ञापयज्ञापयस्वाहा इतिज्वालयेत् ॥ ततः ॥ अग्निम्प्रज्वलितव्वन्देजातवेदंहुताश नम् ॥ सुवर्ण्णवर्ण्णममलंसमिद्धंव्विश्वतोमुखम् ॥ इत्युपतिष्ठे त् ॥ ततोऽग्नेत्वममुकनामासीतिनामकृत्वा ॐवैश्वानरजातवेद इहावहलोहिताक्षसर्व्वकर्म्माणिसाधयस्वाहा ॥ अनेनाग्र्घ्यादि भिःसम्पूज्य ॐ अग्निहिरण्यादिसप्तजिह्वाभ्योनमः ॐ सहस्रा र्च्चिषेहृदयायनमः ॐ इत्याद्यग्निषडङ्गेभ्योनमः ॐ अग्नयेजातवे दसेत्याद्यष्टमूर्त्तिभ्योनमः तद्बाह्ये ॐ ब्राह्म्याद्यष्टशक्तिभ्योन मः तद्बहिः ॐ पद्माद्यष्टनिधिभ्योनमः तद्बाह्ये ॐ इन्द्रादि लोकपालेभ्योनमः ॥ तद्बाह्ये ॐ वज्राद्यस्त्रेभ्योनमःतत ꣳप्रादेश मात्रङ्कुशपत्रद्वयङ्घृतमध्येनिꣳक्षिप्यसव्यासव्यमध्यभागेषुईडा म्पिङ्गलां सुषुम्नान्ध्यात्वा होमङ्कुर्य्यात् ॥ स्रुवेणदक्षिणभागा दाज्यङ्गृहीत्वा ॐ अग्नयेस्वाहेत्यग्नेर्दक्षिणनेत्रेजुहुयात् ॥ तथा वामभागाज्यङ्गृहीत्वा ॐ सोमायस्वाहेतिवामनेत्रेजुहुयात् ॥ ततोमध्यभागादाज्यङ्गृहीत्वा ॐ अग्नीषोमाभ्यांस्वाहेत्यग्नेर्ल्ल लाटनेत्रेजुहुयात् ॥ पुनर्दक्षिणतः नमइति घृतङ्गृहीत्वा ॐ अग्नयेस्विष्टकृतेस्वाहेत्यग्निमुखे ॥ ततोमहाव्याहृतिहोमः ॥ ॐ भूःस्वाहा ॐ भुवःस्वाहा ॐ वैश्वानरजातवेदइहावह लोहिताक्षसर्व्वकर्म्माणिसाधयस्वाहा इत्यनेनत्रिवारञ्जुहुया

त् ॥ ततोऽग्नौमूलेनपीठपूर्व्वकन्देवतांसम्पूज्य तन्मुखेघृतेनमूल मन्त्रेणपञ्चविंशतिवारञ्जुहुयात् वह्निदेवतयोरात्मनासहैक्यँव्वि भाव्यमूलमन्त्रेणएकादशाहुतीर्ज्जुहुयात् ॥ ततोमूलमन्त्रस्या ङ्गदेवताभ्यःस्वाहा ॥ शक्तश्चेत्प्रत्येकमेकैकाहुतिञ्जुहुयात् ॥ तत×सङ्कल्पँव्विधायतत्तत्कल्पोक्तद्रव्येणहोमङ्कुर्य्यात् ॥ ततो मूलमन्त्रेणपूर्ण्णाहुतिन्दत्त्वासंहारमुद्रयास्वेष्टदेवतांहृदयेसमानी यक्षमस्वेतिविसृज्यदक्षिणान्दत्त्वा अच्छिद्रावधारणङ्कुर्य्यात् ॥

इतिसंक्षेपहोमप्रकरणम् ।

